শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীসুদর্শনাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥শ্রীসুদর্শনাষ্টোত্তরশতনামস্তোত্রম্ ॥

সুদর্শনশ্চক্ররাজঃ তেজোৰ্যূহো মহাদ্যুতিঃ।
সহস্রবাহুর্দীপ্তাঙ্গঃ অরুণাক্ষঃ প্রতাপৱান্॥ ১ ॥

অনেকাদিত্যসঙ্কাশঃ প্রোদ্যজ্জ্বালাভিরঞ্জিতঃ।
সৌদামিনীসহস্রাভো মণিকুণ্ডলশোভিতঃ॥ ২ ॥

পঞ্চভূতমনোরূপো ষটকোণান্তরসংস্থিতঃ।
হরান্তঃ করণোদ্ভূতরোষভীষণৱিগ্রহঃ॥ ৩ ॥

হরিপাণিলসতপদ্মৱিহারারমনোহরঃ।
শ্রাকাররূপসসর্ৱজ্ঞঃ সর্ৱলোকার্চিতপ্রভুঃ॥ ৪ ॥

চতুর্দশসহস্রারঃ চতুর্ৱেদমযোনলঃ।
ভক্তচান্দ্রমসজ্যোতিঃ ভৱরোগৱিনাশনঃ॥ ৫ ॥

রেফাত্মকো মকারশ্ব রক্ষোসৃগ্রূষিতাঙ্গকঃ।
সর্ৱদৈত্যগ্রীৱনালৱিভেদনমহাগজঃ॥ ৬ ॥

ভীমদংষ্ট্রোজ্জ্বলাকারো ভীমকর্মা ত্রিলোচনঃ।
নীলৱর্ত্মা নিত্যসুখো নির্মলশ্রীর্নিরঞ্জনঃ॥ ৭ ॥

রক্তমাল্যাম্বরধরো রক্তচন্দনরূষিতঃ।
রজোগুণাকৃতিশশূরো রক্ষঃকুলযমোপমঃ॥ ৮ ॥

নিত্যক্ষেমকরঃ প্রাজ্ঞো পাষণ্ডজনখণ্ডনঃ।
নারাযণাজ্ঞানুৱর্তী নৈগমান্তপ্রকাশকঃ॥ ৯ ॥

বলিনন্দনদোর্দণ্ডখণ্ডনো ৱিজযাকৃতিঃ।
মিত্রভাৱী সর্ৱমযো তমোৱিধ্বংসকস্তথা॥ ১০ ॥

রজসসত্বতমোদ্বর্তী ত্রিগুণাত্মা ত্রিলোকধৃত্।
হরিমাযাগুণোপেতোৰ্যযোক্ষস্বরূপভাক্॥ ১১ ॥

পরমাত্মা পরং জ্যোতিঃ পঞ্চকৃত্যপরাযণঃ।
জ্ঞানশক্তিবলৈশ্বর্যৱীর্যতেজঃপ্রভামযঃ॥ ১২ ॥

সদসতপরমঃ পূর্ণো ৱাঙ্মযো ৱরদোচ্যুতঃ।
জীৱো গুরুর্হংসরূপো পঞ্চাশতপীঠরূপকঃ॥ ১৩ ॥

মাতৃকামণ্ডলাধ্যক্ষো মধুধ্বংসী মনোমযঃ।
বুদ্ধিরূপশ্চিত্তসাক্ষী সারো হংসাক্ষরদ্বযঃ॥ ১৪ ॥

মন্ত্রযন্ত্রপ্রভাৱজ্ঞো মন্ত্রযন্ত্রমযো ৱিভুঃ।
স্রষ্টা ক্রিযাস্পদশশুদ্ধো আধারশ্চক্ররূপকঃ॥ ১৫ ॥

নিরাযুধো হ্যসংরম্ভঃ সর্ৱাযুধসমন্বিতঃ।
ওঙ্কাররূপী পূর্ণাত্মা আঙ্কারসসাধ্যবন্ধনঃ॥ ১৬ ॥

ঐঙ্কারো ৱাকপ্রদো ৱাগ্মী শ্রীঙ্কারৈশ্বর্যৱর্ধনঃ।
ক্লীঙ্কারমোহনাকারো হুংফটক্ষোভণাকৃতিঃ॥ ১৭ ॥

ইন্দ্রার্চিতমনোৱেগো ধরণীভারনাশকঃ।
ৱীরারাধ্যো ৱিশ্বরূপঃ ৱৈষ্ণৱো ৱিষ্ণুরূপকঃ॥ ১৮ ॥

সত্যৱ্রতসসত্যপরঃ সত্যধর্মানুষঙ্গকঃ।
নারাযণকৃপাৱ্যূহ তেজশ্চক্রসসুদর্শনঃ॥ ১৯ ॥

॥ ইতি শ্রীসুদর্শনাষ্টোত্তরশতনামস্তোত্রং সংপূর্ণম্॥